शिरोरोगः, पुं, (शिरसो रोगः ।) मस्तकपीड़ा । यथा,—
अथ शिरोरोगाधिकारः । अत्र शिरोरोगस्य निदानं सङ्ख्याञ्चाह ।
"शिरोरोगास्तु जायन्ते वातपित्तकफैस्त्रिभिः ।
सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा ॥
सूर्य्यावर्त्तानन्तवातशङ्खकार्द्धावभेदकाः ।
एकादशविधस्यास्य लक्षणानि प्रचक्षते ॥"
शिरोरोगा अत्र शिरोरोगः शूलरूपा रुगभिधीयते । वातपित्तकफैस्त्रिभिः । ननु वातपित्तकफैरित्युक्ते तत्त्रित्वबोधात् । किमर्थं त्रिभिरिति पदम् । वातपित्तकफानां पृथक्कारणत्वबोधनार्थम् । तर्हि सर्व्व एव शिरोरोगाः सन्निपातसमुद्भवा इति कथम् । तदा वातादय उल्वणतया पृथक्कारणानि बोद्धव्यानि । क्षयेण रसादिक्षयेण ॥*॥ वातिकस्य लक्षणमाह ।
"यस्यानिमित्तं शिरसो रुजश्च
भवन्ति तीव्रा निशि चातिमात्रम् ।
बन्धोपतापैः प्रशमश्च यत्र
शिरोऽभितापः स समीरणेन ॥"
भवेदिति शेषः । अनिमित्तं अतर्कितविप्रकृष्टनिमित्तम् । निशि चातिमात्रं रात्रौ शैत्येन रोगाधिक्यात् । प्रतापः स्वेदनम् । शिरोऽभितापः शिरःपीड़ा ॥*॥ पैत्तिकमाह ।
"यस्योष्णमङ्गारचितं यथैव
भवेच्छिरो दह्यति नासिकाग्रम् ।
शीतेन रात्रौ च भवेच्छमश्च
शिरोऽभितापः स तु पित्तकोपात् ॥"
दह्यतीत्यार्षत्वात् ॥*॥ श्लैष्मिकमाह ।
"शिरो भवेद्यस्य कफोपदिग्धं
गुरु प्रतिष्टब्धमथो हिमञ्च ।
शूनाक्षिनासावदनञ्च यस्य
शिरोऽभितापः स कफप्रकोपात् ॥"
कफोपदिग्धं अन्तःकफलिप्तम् । प्रतिष्टब्धं स्तब्धशिरम् ॥*॥ सान्निपातिकमाह ।
"शिरोऽभितापे त्रितयप्रवृत्ते
सर्व्वाणि लिङ्गानि समुद्भवन्ति ॥"*॥
रक्तजमाह ।
"रक्तात्मकः पित्तसमानलिङ्गः
स्पर्शासहत्वं शिरसो भवेच्च ॥"
पैत्तिकाद्भेदकलिङ्गमाह । शिरःस्पर्शासहत्वमिति ॥*॥ क्षयजमाह ।
"वसाबलासक्षतसम्भवानां
शिरोगतानामतिसंक्षयेण ।
क्षयप्रवृत्तिः शिरसोऽभितापः
कष्टो भवेदुग्ररुजोऽतिमात्रम् ॥"
क्षतसम्भवं रुधिरम् । कष्टः कृच्छ्रसाध्यः ।
"भ्रमो भ्रमति तुद्येत शिरो विभ्रान्तनेत्रता ।
मूर्च्छा गात्रावसादश्च शिरोरोगे क्षयात्मिके ॥"
क्रिमिजमाह ।
"निस्तुद्यते यस्य शिरोऽतिमात्रं
संभक्ष्यमाणं स्फुरतीव चान्तः ।
घ्राणाच्च गच्छेद्रुधिरं सपूयं
शिरोऽभितापः क्रिमिभिः सघोरः ॥"
संभक्ष्यमाणं क्रिमिभिरिति शेषः । घ्राणाच्चेति चकारेण क्रिमिनिर्गमोऽपि बोध्यते ॥*॥ सूर्य्यावर्त्तमाह ।
"सूर्य्योदयं या प्रतिमन्दमन्द-
मक्षिभ्रुवं रुक् समुपैति गाढ़म् ।
विवर्द्धते चांशुमता सहैव
सूर्य्यापवृत्तौ विनिवर्त्तते च ॥
शीतेन शान्तिं लभते च किञ्चि-
दुष्णेन जन्तुः सुखमाप्नुयाद्वा ।
सर्व्वात्मकं कष्टतमं विकारं
सूर्य्यावर्त्तं तमुदाहरन्ति ॥"
सूर्य्योदयमिति लक्षीकृत्य आरभ्येति यावत् । सूर्य्यस्यापवृत्तौ सूर्य्यस्याधोगतौ ॥ * ॥ अनन्तवातमाह ।
"दोषास्तु दुष्टाः स्वयमेव मन्यां
संपीड्य घाटां खरुजां सुतीव्राम् ।
कुर्व्वन्ति सोऽक्षि भ्रुवि शङ्खदेशे
स्थितिं करोत्याशु विशेषतस्तु ॥
गण्डस्य पार्श्वे तु करोति कम्पं
हनुग्रहं लोचनजान् विकारान् ।
अनन्तवातं तमुदाहरन्ति
दोषत्रयोत्थं शिरसो विकारम् ॥"
एवशब्दोऽवाप्यर्थः । अव्ययानामनेकार्थत्वात् । खरुजां स्वस्य रुजां व्यथादाहगौरवादिरूपां दोषाः कुर्व्वन्ति । अयमनन्तवातः । स अनन्तवातः अक्ष्यादिषु स्थितिं करोति । विशेषतः गण्डपार्श्वे स्थितिं करोति । पीड़या स्थितिं कृत्वा कम्पादींश्च करोति ॥ * ॥ शङ्खकमाह ।
"पित्तरक्तानिला दुष्टाः शङ्खदेशे विमूर्च्छिताः ।
तीव्ररुग्दाहरागं हि शोथं कुर्व्वन्ति दारुणम् ॥
स शिरोविषवद्वेगान् निरुध्याशु गलं तथा ।
त्रिरात्राज्जीवितं हन्ति शङ्खको नाम नामतः ।
त्र्यहाज्जीवति भैषज्यं प्रत्याख्येयस्य कारयेत् ॥"
पित्तरक्तानिलाः अत्र कफोऽपि योज्यः । कृतानुतापः कफपित्तरक्तैरिति सुश्रुतवचनात् । विमूर्च्छिताः प्रवृद्धाः । स शोथः । त्रिरात्रात् त्रिरात्रमध्ये मारयति ॥*॥ अर्द्धावभेदकमाह ।
"रूक्षाशनाध्यशनावश्याप्राग्वातमैथुनैः ।
वेगसंधारणायासव्यायामैः कुपितोऽनिलः ॥
केवलः सकफो वार्द्धं गृहीत्वा शिरसो बली ।
मन्याभ्रूशङ्खकर्णाक्षिललाटार्द्धेषु वेदनाम् ॥
शस्त्रारणिनिभां कुर्य्यात्तीव्रां सोऽर्द्धावभेदकः ।
नयनं वाथवा श्रोत्रमभिवृद्धो विनाशयेत् ॥"
अवश्या अवश्यायः । आयासः अतिबलेन भारोद्वहनादिभिः । व्यायामः स्वल्पश्रमः । शस्त्रारणिनिभां शस्त्रपातेनेव वज्रपातेनेव वेदनाम् ॥*॥ अथ शिरोरोगाणां चिकित्सा ।
"वातजाते शिरोरोगे स्नेहस्वेदं विवर्द्धनम् ।
पानाहारोपनाहांश्च कुर्य्याद्वातामयापहाम् ॥
कुष्ठमेरण्डमूले च नागरे तत्र पेषितम् ।
कटूष्णं शिरसः पीड़ां भाले लेपनतो हरेत् ॥
रसः श्वासकुठारोऽस्यस्तस्य नस्यं विशेषतः ।
शिरःशूलं हरत्येव विधेयो नात्र संशयः ॥"*॥
अथ शिरोवस्तिविधिः ।
"आशिरोव्यापि तच्चर्म षोड़शाङ्गुलमुच्छ्रितम् ।
तेनावेष्ट्य शिरोऽधस्तान्माषकल्केन लेपयेत् ॥
निश्चलस्योपविष्टस्य तैलैः कोष्णैः प्रपूरयेत् ।
धारयेदारुजः शान्त्यै यामं यामार्द्धमेव च ॥
शिरोवस्तिर्हरत्येष शिरोरोगं मरुद्भवम् ।
हनुमन्याक्षिकर्णार्त्तिमर्द्दितं मूर्द्धकम्पनम् ।
विना भोजनमेवैष शिरोवस्त्याः प्रयुज्यते ॥
दिनानि पञ्च वा सप्त रुजि तत्परतोऽपि वा ।
ततोऽपनीतस्नेहस्तु मोचयेद्वस्तिबन्धनम् ॥
शिरोललाटवदनग्रीवादीनि विमर्द्दयेत् ।
सुखोष्णेनाम्भसा गात्रं प्रक्षाल्याश्नाति यद्धितम् ॥
आमिषं जाङ्गलं पथ्यं तत्र शाल्यादयोऽपि च ।
मुद्गान् माषान् कुलत्थांश्च खादेद्वा निशि केवलान् ॥
कटुकोष्णान् ससर्पिष्कानुष्णं क्षीरं पिबेत्तथा ।
पित्तात्मके शिरोरोगे शीतानां चन्दनाम्भसाम् ॥
कुमुदोत्पलपद्मानां स्पर्शाः सेव्याश्च मारुताः ।
सर्पिषः शतधौतस्य शिरसा धारणं हितम् ॥
रसः श्वासकुठारोत्थः कर्पूरं कुङ्कुमं नवम् ।
शीतं छागीपयः सर्व्वं वर्द्धनेनानुवर्त्तयेत् ॥
तस्य नस्यं भिषग्दद्यात् पित्तलायां शिरोरुजि ।
किन्तु मस्तकशूलेषु सर्व्वेष्वेवं हितं मतम् ॥
गुड़नागरकल्कस्य नस्यं मस्तकशूलनुत् ॥*॥
रक्तजे पित्तवत् सर्व्वं भोजनालेपसेवनम् ॥
शीतोष्णयोश्च विन्यासो विशेषो रक्तमोक्षणम् ।
कफजे लङ्घनं स्वेदो रूक्षोष्णैः पाचनात्मकैः ॥*॥
सन्निपातभवे कार्य्या सन्निपातहरी क्रिया ।
पुराणसर्पिषः पानं विशेषेण दिशन्ति हि ॥
एरण्डमूलं तगरं शताह्वा
जीवन्तिका सैन्धवराजिके च ।
भृङ्गं विड़ङ्गं मधुयष्टिका च
विश्वौषधं कृष्णतिलस्य तैलम् ॥
अजापयस्तैलविमिश्रितञ्च
चतुर्गुणं भृङ्गरसे विपक्कम् ।
षड्बिन्दवो नासिकयोः प्रदेयाः
सर्व्वाणि हन्युः शिरसो विकारान् ॥
च्युतांश्च केशान् पलितांश्च दन्तान्
निर्बन्ध्य मूलान् प्रकटीकरोति ।
सुपर्णगृध्रप्रतिमञ्च चक्षुः
कुर्व्वन्ति बाह्वोरधिकं बलञ्च ॥"
जीवन्तिका अत्र हरीतकी शाकविशेषश्च । इति षड्बिन्दुतैलम् ॥ * ॥
"क्षयजे क्षयनाशाय कर्त्तव्यो बृंहणो विधिः ।
पाने नस्ये च सर्पिः स्याद्वातघ्नैर्मधुरैः शृतम् ॥*॥
क्रमिजे व्योषणञ्चाहुः शिग्रुबीजैश्च लावणम् ।
अजामूत्रयुतं नस्यं कर्त्तव्यं क्रमिनुत् परम् ॥
सूर्य्यावर्त्ते विधातव्यं नस्यकर्म्मादिभेषजम् ।
योजयेत् सगुड़ं सर्पिर्घृतपूपांश्च भक्षयेत् ॥